**आन्तरतम्य** न० अन्तरतमस्य अत्यन्तसदृशस्य भावः ष्यञ्। सौसादृश्ये "बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्ता-स्तथाप्यान्तरतम्यपरीक्षायामुपयोक्ष्यन्ते" सि०कौ०।

**आन्तरागारिक** त्रि० अन्तरागारस्य धर्म्यम् ठक्। अन्तरा-गारनियुक्तपुरुषस्य धर्म्ये अवरोधरक्षणादौ।

**आन्तरप्रपञ्च** पु० कर्म्म०। आध्यात्मिके आभ्यन्तरे द्वैतविस्तारे स चान्नमयादिकोषपञ्चकं शरीरत्रयम् जन्मस्थित्यादयः षड्-भावविकाराः त्वङ्मांसादिषाट्कौशिकस्थूलदेहः अशना-यापिपासादि षडूर्म्मयः श्रोत्रादिज्ञानेन्द्रियपञ्चकं वागाभिक-र्म्मेन्द्रियपञ्चकं प्राणादिवायुपञ्चकं मनआद्यन्तःकरणचतुष्टयं सङ्कल्पाद्यन्तःकरणवृत्तयः जागराद्यवस्थात्रयं तदभिमानि-विश्वतैजसप्राज्ञाःसमाधिमूर्च्छादयः क्रोधाद्यरिषड्वर्गः साध-नचतुष्टयं सत्वादिगुणत्रयं सुखदुःखज्ञानाज्ञानादि अविद्यादिक्लेशपञ्चकम् मैत्र्यादिभावनाचतुष्टयं यमाद्य-ष्टाङ्गम् प्रत्यक्षादिप्रमाणवर्गः रोगारोग्यसमुदायोय-थायोग्यं विविधनामरूपगुणधर्मादयः भोगापवर्गौ च। एवमन्यमतेऽप्यूह्यम्।

**आन्तराल** त्रि०अन्तरालं मध्यस्थितिं वेत्ति अण्। देहाभ्य-न्तर एवात्मनः स्थितिवेत्तरि जीवस्याणुत्ववादिनि पूर्ण-प्रज्ञे माध्वे स हि आत्मनोविभुत्वखण्डनेन देहाभ्य-न्तरे एव स्थितिं मन्यमानस्तस्याणुत्वम् प्रतिपेदे आत्मशब्दे तन्मततुक्तप्रायम् अधिकं माध्वशब्दे वक्ष्यते। "अणुं वदन्त्यान्तरालाः सूक्ष्मनाडीप्रचारतः। रोम्णः सहस्रभागेन नाडीषु प्रचरत्ययमिति" तस्य सिद्धान्तः "बालाग्रशतधारस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेय इति" श्रुतिमनुसृत्य तथा तेनाङ्गीकृतम्। दुर्विज्ञेयत्वेन सूक्ष्मत्वमौपचारिकमिति तु वेदान्त्यादयः।

**आन्तरि(री)क्ष** त्रि० अन्तरि(री)क्षे भवः अण्। आकाश-भवे १उत्पातादौ "उत्पातांस्त्रिविधान् प्राह नारदो भगवान् प्रभो! दिव्यांश्चैवान्तरीक्षांश्च पार्थिवांश्च पिता-मह!" ज्यो०। २अन्तरीक्षभवे जले च। अम्बुशब्दे ३२० पृष्ठेऽस्य विवृतिः।

**आन्तरीपक** त्रि० अन्तरीपे भवः धूमा० वुञ्। अन्तरीप-भवे धूमादिगणे द्वीपसाहचर्य्यात् देशवाचित्वाच्च अन्तरीप-शब्दएव बोध्यः अन्तरीय इति पाठस्तु प्रामादिकः।[ङीप्।

**आन्तर्गणिक** त्रि० अन्तर्गणं भवः ठञ्। गणमध्यभवे स्त्रियां

**आन्तर्गेहिक** त्रि० अन्तर्गेहं भवः ठञ्। गेहमध्यभवे स्त्रियां ङीप्। अन्तर्वेशिकान्तर्वेश्मकादयोऽप्यत्र।

**आन्तर्य्य** न० अन्तरस्य भावः ष्यञ्। अन्तर्वर्त्तित्वे।

**आन्तिका** स्त्री अन्तिकेव अण् अजा०टाप्। ज्येष्ठायाम् भगिन्याम्।

**आन्त्र** न० अमत्यनेन अम–गतौ क्त उपधादीर्घः। १वायु-वाहकनाड़ीभेदे। अन्त्रस्येदम् अण्। २अन्त्रसम्बन्धिनि त्रि० स्त्रियां ङीप्।

**आन्दोल** दोलने मुहुश्चालने अद०चुरा०उभय०सक०सेट्। आन्दोलयति ते आन्दुदोलत् त। क्त आन्दोलितः।

**आन्दोलक** पु० आन्दोलयति ण्वुल्। दोलनकर्त्तरि।

**आन्दोलन** न० आन्दोल–भावे ल्युट्। १पुनःपुनर्दोलने, २मुहुश्चालने "किन्त्वासामविन्दसुन्दरदृशां द्राक् चामरा-न्दोलनात्" उद्भटः ३अनुसन्धाने च।

**आन्धसिक** त्रि० अन्धो भक्तं शिल्पमस्य ठक्। पाचके सूदे।

**आन्धीगव** न०अन्धीगुना ऋषिभेदेन दृष्टं साम–अण्। तृती-यसवने गेये आर्भवपवमानसूक्तगते सूक्तभेदे तच्च सूक्तम् ऊहगाने१प्र०११क०पठितम् तच्च साम०स०भा०दर्शितम् यथा "श्यावश्वान्धीगवेऽनुष्टुब्वानेये गाय्यतेऽथ वा। पुरेव लिङ्गं जगती चतुर्विंशति-कीर्त्तनम्। इदमाम्नायते "पञ्च-छन्दा आवापः आर्भवः पवमानः सप्तसामा, गायत्र-संहिते गायत्रेत्र तृचे भवतः, श्यावाश्वान्धीगवे आनुष्टुभे तृचे भवतः, उष्णिहि शफम्, ककुभि पौष्कलम्, काव-मन्त्यं जगतीषु" इति। अयमर्थः अस्ति तृतीयसवने पवमानः आर्भवसंज्ञकः, तस्मिन् पञ्च सूक्तानि, सप्त सामानि, "स्वादिष्ठया मदिष्ठा" इत्येकं सूक्तम् (उ,२प्र, १५), तस्मिन् गायत्र्यस्तिस्र ऋचः तासु "गायत्रम्" "संहितम्" (उ,१प्र,८) चेति द्वे सामानी, "पु-रोजिती वो अन्धसः" इति सूक्तान्तरम् (उ,१प्र,१८) तत्रैकानुष्टुबुत्तरे द्वे गायत्र्यौ तासु "श्यावाश्वम्" (ऊ,१प्र,११) "आन्धीगवम्" (उ,२प्र,११) चेति द्वे सा-मनी, "इन्द्रमच्छ सुता" इत्यपरं सूक्तम् (ऊ,१प्र,१८), तस्मिन्नुष्णिहस्तिस्रः तासु "शफम्" साम, "पवस्व मधुमत्तम" इति प्रगाथः (उ,१प्र,१६), तस्मिन् पूर्व्वा ककुप्, उत्तरा पङ्क्तिः। तत्र "पौष्कलम्" (ऊ,१प्र,६) साम, "अभिप्रियाणि पवते च नोहित" इत्यन्यं सूक्तम् (उ,१प्र,१६), तत्र तिस्रोजगत्यः तासु "कावम्" (ऊ,१प्र,१३) साम"।

**आन्ध्य** न० अन्धस्य भावः ष्यञ्। दृष्टिशक्तिराहित्ये यत्र प्रतिघाते तद्भवति तद्दर्शितं सुश्रु०। शिरानाड़ीरूपकस्य "भ्रूपु-